पू॰ त्करणादेः वस्त्रक्रीती । क्वचिन्न । धनक्रीता । क्तादल्पाख्ये । अभ्रलिप्ती द्यौः ॥ अल्पत्वे कि-
५६ म् । चन्दनलिप्तान्या मूर्त्तिः स्वाङ्गात्स्वाङ्गवाचिनोऽदन्तादसंयोगोपधादुपसर्जनाद्वा ।-
स्त्रियामाप् । सुमुखी । सुमुखा । सुकेशी । सुकेशा । संयोगोपधात्तु सुगुल्फा । नासिकोदरौष्ठजं-
घादन्तकर्णशृङ्गाच्च तुङ्गनासिकी । तुङ्गनासिका । मन्दोदरी । मन्दोदरा । बिम्बोष्ठी । बिम्बोष्ठा-
सुजंघी सुदन्ती । सुकर्णी । सुशृङ्गी । अङ्गगात्रकण्ठपुच्छाच्च । स्वङ्गी । सुगात्री । सुकण्ठी । सुपु-
च्छी । पक्षे स्वङ्गेत्यादि । कवरमणिविषशरेभ्यः परात्पुच्छान्नित्यम् । कवरपुच्छी । मणि-
पुच्छी । विषपुच्छी । शरपुच्छी । उपमानात्पक्षपुच्छाभ्याम् । श्येनपक्षी । श्येनपुच्छी । नक्रो
डादि बह्वचः स्वरात् ॥ कल्याणक्रोडा । सुजघना । सहनञ्विद्यमानपूर्व्वान्न । सकेशा । अके-
शा । विद्यमाननासिका । नखमुखात्संज्ञायाम् । शूर्पणखा । गौरमुखा । संज्ञायां किम् ।
ताम्रमुखी कन्या । वोर्गुणात् । उदन्ताद्गुणवाचिनो वा स्त्रियामीप् । पट्वी । पटुः । बह्वी- ५६

वङ्कुः। खरुसंयोगोपधान्न। खरुः। अपवादः [illegible] पाणिनी। शार्ङ्गी। शकटी। शकटिः
शक्त्यर्थे किम्। भूतिः। अजातिः। [illegible] पद्धती। पद्धतिः। [illegible] मन्वादेः। मनुमूलक
वृषाकप्यग्निकुसितकुसिदानामैः [illegible] पुंयोगे। [illegible] कुसितायी। कुसि-
दायी। वृषाकपायी। अग्नायी। मनोरौ वा। मनावी। मनायी। मनुः। पत्न्यादयो निपात्याः। पत्नी
सपत्नी। एकपत्नी। वीरपत्नी। [illegible] वृद्धपत्नी। वृद्धपतिः। स्थूलपत्नी। स्थूलपतिः। एता। एनी
हरिता। हरिणी। रोहिता। रोहिणी। श्येता। श्येनी। असिता। असिक्नी। पलिता। पलिक्नी। इत्यादि
इतो मनुष्यजातेर्ङीष्। दाक्षी। अवन्ती। कुन्ती। ऊङुतः। उकारान्तादयोपधान्मनुष्यजातिवाचिनः
स्त्रियामूङ् प्रत्ययः। कुरूः। अयोपधात्किम्। अध्वर्युः स्त्री। पङ्गोश्च। पङ्गूः। श्वशुरस्योकाराका-
रलोपश्च। श्वश्रूः। उपमानवाचिपूर्वपदादूरूत्तरपदादूङ्। करभोरूः। संहितशफलक्षणवाम-
सहितसहादेरूरोरनौपम्येऽपि। संहितोरूः। शफोरूः। लक्षणोरूः। वामोरूः। सहितोरूः। सहोरूः। नृन-
रयोर्वृद्धिश्च। नारी। यूनस्तिः। युवन्शब्दात्स्त्रियां तिः। युवतिः। इति स्त्रीप्रत्ययाः। सिद्धा-

र्थे प्रथमा। नामार्थमात्रे लिङ्गमात्राधिक्ये च प्रथमा विभक्तिः। नियतोपस्थितिको नामार्थः। उच्चैः
। नीचैः। कृष्णः। श्रीः। ज्ञानम्। द्रोणः। खारी। आढकम्। एकः। द्वौ। बहवः। अलिङ्गा नियतलिङ्गा-
श्च नामार्थमात्र इत्यस्योदाहरणम्। अनियतलिङ्गास्तु लिङ्गमात्राधिक्यस्य। तटः। तटी।
तटम्। आमन्त्रणे च। आभिमुख्ये कर्त्तरि प्रथमा। हे देव। हे देवौ। हे देवाः। ओम् अथो अथोस्
भूवङ्गवद्घचलात्त्वा निपात्यावौ। ओस्त्वे। अथो नमस्ते। अथो याहि। शेषाः कार्य्ये कर्तृसाधनयो-
र्दानपात्रे विश्लेषावधौ सम्बन्धाधारमात्रयोः। द्वितीयाद्या विभक्तयः षडर्थेषु भवन्ति। कार्य्ये कर्म्म-
कारके द्वितीया। कटङ्करोति। कारको रूपमपश्यति चाक्षुषः। राज्यं प्राप्नोति धर्मिष्ठः सोमं सुनो-
ति सोमपाः। कर्त्तरि करणे च तृतीया। भिन्नः पुष्पेण तक्ष्णा रावणो लोकरावणः कराग्रेणाविद्धो
ऽपि वानरैर्युध्यते पुनः॥ दानपात्रे चतुर्थी। वेदं विप्राय ददाति। क्रियया यमाप्नोति। तमो-
पि चतुर्थी। पत्ये शेते। विश्लेषो विभागस्तस्यावधौ पञ्चमी। हिमवतोऽवतरति गङ्गा। धावतो
ऽश्वात् पतत्। सम्बन्धे षष्ठी॥ राज्ञः पुरुषः। आधारे सप्तमी॥ औपश्लेषिकः सामीपिकोऽभि-

व्यापको वैषयिको नैमित्तिक औपचारिकश्चेति सोऽधारः। कटे शेते कुमारोऽसौ वटे गावस्सु-
शेरते॥ तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परम्। युद्धे सन्नह्यते धीरोऽङ्गुल्यग्रे करिणां शतम्॥
क्रियालक्षणभावलक्षणापि सप्तमी। वर्षति देवे चौर आयातः। विनासहेनमस्स्वस्तिनिर्धारणा-
न्यादिभिश्च। एतैर्योगे द्वितीयाद्या विभक्तयः। विनाद्योगे द्वितीया। विना पापं सर्व्वं फलति।
अन्तरेण स्त्रियोगि जीवितेन। अन्तरा त्वां मां हरिः। जपमनु प्रावर्षत्। अनु हरिं सुराः। भक्तो ह-
रिमभि। उप हरिं सुराः। नदीमन्ववसिता सेना। आतिष्ठेनानुकूलः। अभितो ग्रामम्। सर्वतोन-
गरम्। धिग् जाल्मम्। उपर्युपरि पर्व्वतम्। अध्यधि लोकम्। अध्यधि सुखम्। अधोऽधो धाम-
मम्। उभयतः कूलम्। सत्त्वम्प्रति समया निकषा हा प्रति परि योगेऽपि। कालाध्वनोरत्यन्त-
योगे। मासमधीते क्रोशमर्वतः। मासङ्गुडधानाः। मासं कल्याणी। क्रोशं कुटिला नदी। अत्यन्त-
योगे किम्। मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः। अधिपूर्व्वाणां शीङ्स्थासामाधारः कर्म
अभिनिविशश्च। उपान्वध्याङ्वसः। अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः। पु०

ति॥ अभिनिविशते सन्मार्गम्। उपवसति। अनुवसति। अधिवसति। आवसति वा वैकुण्ठं
हरिः। नाभुक्त्यर्थस्य। वने उपवसति। इत्यादि। सहादियोगे तृतीया। सह शिष्येणागतो गुरुः।
एवं साकं सार्द्धं समं योगेऽपि। येनाङ्गविकारः। येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते तत
स्तृतीया। अक्ष्णा काणः। अङ्गविकारः किम्। अक्षि काणमस्य। कञ्चित्प्रकारं प्राप्तस्य लक्षणे।
जटाभिस्तापसः। प्रकृत्यादिभ्युपसंख्या। प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनैति
। विषमेणैति। द्विद्रोणेन धान्यं क्रीणाति। सुखेन दुःखेन याति। दिवः करणं कर्मसंज्ञं वा
स्यात्। अक्षैरक्षान्वा दीव्यति। तुल्यार्थयोगे। कृष्णेन तुल्यः। रामेण सदृशः। फलप्राप्तौ काला
ध्वनोरत्यन्तयोगे तृतीया। अह्ना क्रोशेन वानुवाकोऽधीतः। फलप्राप्तौ किम्। मासमधीतो-
नायातः। अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया। दास्या संयच्छते कामुकः। धर्म्ये तु
भार्यायै संयच्छति। नमः स्वस्त्यादियोगे चतुर्थी। नमो नारायणाय। एवं स्वस्ति स्वाहा स्वधा अ
लं वषट् योगे च। उपपदविभक्तेः कारकविभक्तिर्बलीयसी। नमस्करोति देवान्। अभ्यादि

योगे षष्ठ्यपि । भोजनाय भोजनस्य वा प्रभुः समर्थः शक्तः । कुलाय कुलस्य वा मद्रं भद्रं कुशलं
सुखमायुष्यमर्थः प्रयोजनं वा भूयात् । कृत्यार्थे धातुमिथ्यायोगे च मारो । हरये रोचते भक्तिः । श्ला-
घह्नुङ्स्थाशपां प्रयोगे बोधयितुमीप्सितः । गोपी कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा । धारेरुत्तम-
र्णः । भक्ताय धारयति मोक्षं हरिः । स्पृहेरीप्सितः । पुष्पेभ्यः स्पृहयति । क्रुधद्रुहेर्ष्यासूयार्था-
नां यं प्रति कोपः । कर्यस्य सः । हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति । इत्यादि । अन्यतो आदियो-
गे पञ्चमी । ऋते ज्ञानान्न मुक्तिः । अन्यो वाह्यो हरेः । आराद्वनात् । इतरो ग्रामात् । भिन्नः कृ-
ष्णात् । पूर्वो ग्रामात् । प्राग् ग्रामात् । दक्षिणो ग्रामात् । विना कृष्णात् कृष्णेन कृष्णं वा । उपाध्याया-
दधीते । विद्यास्वीकारे पञ्चमी । जनिकर्तुः प्रकृतिः जायमानस्य कार्यस्य योनिरुपादानं तथा स्यात् सं-
ज्ञं स्यात् । ब्रह्मणः प्रजाः प्रजायन्ते । यतश्चाध्वकालयोर्निर्माणं तत्र पञ्चमी । पञ्चमीयुक्ताद-
ध्वनः प्रथमासप्तम्यौ कालात्सप्तमी । वनाद् ग्रामो योजनं योजने वा । कार्तिक्या आग्रहायणी मासे
। वर्जने अपपरिभ्यां पञ्चमी । अप हरेः संसारः परि हरेः संसारः । आ मुक्तेः संसारः । यतः प्रति- ४

निधि प्रतिदानं तत्र प्रतियोगे पञ्चमी। प्रद्युम्नः कृष्णात्प्रति। तिलेभ्यः प्रतियच्छति माषान्।
हेतौ तृतीयापञ्चम्यौ। जाड्याज्जाड्येन वा बद्धः। स्तोकात्स्तोकेन वा मुक्तः। दूरान्तिकार्थैर्योगे
षष्ठ्यपि। ग्रामस्य दूरान्तिकाद्वा। इत्यादि। निर्धारणे षष्ठीसप्तम्यौ। क्रियागुणजातिसंज्ञाभि
स्समुदायात्पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ। क्रियापराणां क्रियापरेषु वा भग
वद्राधकः श्रेष्ठः। गवां गोषु वा कृष्णा सम्पन्नक्षीरा। नृणां नृषु वा ब्राह्मणः श्रेष्ठः। छात्राणां
छात्रेषु वा मैत्रः पटुः। स्वाम्यादियोगे षष्ठीसप्तम्यौ। गवां गोषु वा स्वामी। अधिपतिः। ईश्वरः।
दायादः। प्रसूतः। प्रतिभूर्वा। अनादराधिक्ये क्रियालक्षणे षष्ठीसप्तम्यौ। रुदति त रुदतो वा-
प्राव्राजीत्। आयुक्तकुशलाभ्यां योगे षष्ठीसप्तम्यौ तात्पर्ये। आयुक्तः कुशलो वा हरिपूजन-
स्य हरिपूजने वा। साधुनिपुणाभ्यां पूजायां सप्तमी। मातरि साधुर्निपुणो वा। प्रसितोत्सुकाभ्यां
योगे तृतीयासप्तम्यौ। प्रसित उत्सुको वा हरिणा हरौ वा॥ साध्वसाधुप्रयोगे सप्तमी। साधुः
कृष्णो मातर्यसाधुर्मातुले। निमित्तात्कर्मयोगे सप्तमी। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कु

ञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः॥ १॥ कस्येन्ननन्तस्य कर्म्मणि। अधीती व्या-
करणे। तादर्थ्ये चतुर्थी। संयमाय श्रुतं धत्ते नरो धर्म्माय संयमम्। धर्म्मं ज्ञानाय मेधावी धन
न्दानाय भुक्तये। तुमोऽप्रयुक्तस्य कर्म्मणि फलेभ्यो याति। क्यब्लोपे कर्म्मण्याधारे च पञ्चमी।
। हर्म्यात्प्रेक्षते। आसनात्प्रेक्षते। कर्तृकार्य्ययोरक्तादौ कृति षष्ठी। कर्त्तरि कार्य्ये च षष्ठी क्तादिव-
र्ज्जिते कृति प्रयुज्यमाने। कृष्णस्य कृतिः जगतः कर्त्ता कृष्णः। गुणकर्म्मणि वा। नेताऽश्वस्य ग्रामे-
ग्रामस्य वा। उभयप्राप्तौ कृति कर्त्तरि षष्ठी न। आश्चर्य्यो गवां दोहोऽगोपेन। स्त्रीप्रत्यययोरका-
कारयोर्योगे नोक्तम्। भेदिका बिभित्सा वा रुद्रस्य जगतः। शेषे कृति वा। शब्दानामनुशास-
नमाचार्य्येणाचार्य्यस्य वा। वर्त्तमानाधारार्थस्य योगे षष्ठी। राज्ञां मतः बुद्धः पूजितो वा। इद
मेषां शयितम्। क्तादेर्नु कुर्वन् कुर्वाणः चकृवान् चक्राणः चक्रिर्वा सुखं हरिः। हरिन्दिदृक्षु-
रलंकरिष्णुर्वा दैत्यान् घातुको हरिः। जगत्स्रष्टा सुखं कर्त्तुम्। विष्णुना हता दैत्याः दैत्यान् ह
तवान् हरिः। ईषत्करः प्रपञ्चो हरिणा। सोमं पवमानः। आत्मानं मण्डयमानः। वेदमधीय-

सि॰ चं॰
पृ॰
६३

न्त्वकर्ता लोकान्। द्विषन्मुतुल्यां। मुरस्य मुरं वा द्विषन्। भविष्यत्कालस्य भविष्यदाधमर्ण्यार्थे-
स्येन स्त्रयोगे षष्ठी न। सतः पालकोऽवतरति। व्रजं गामी। शतं दायी। कृत्यानां कर्तरि वा ष-
ष्ठी। मया मम वा सेव्यो हरिः। उभयप्राप्तौ कर्मणि षष्ठी न। नेतव्या व्रजं गावः कृष्णेन। दूरनिकटार्थै-
र्योगे षष्ठी पञ्चम्यौ। दूरं निकटं वा ग्रामस्य ग्रामाद्वा। दूरनिकटार्थेभ्यो नाम्नार्थमात्रेभ्यो द्विती-
या तृतीया पञ्चमी सप्तमी। ग्रामाद्वा दूरं दूरेण दूरात् दूरे निकटं ग्रामस्य वा। तथैव विप्रकृष्ट
व्यवहारार्थस्य च दिवः कर्मणि षष्ठी। शतस्य दीव्यति वोपसर्गस्य। प्राणस्य प्राणान्वा मतिदीः
च्यति। षष्ठी हेतुप्रयोगेऽन्नस्य हेतोर्वसति। सर्वादेर्हेतुप्रयोगे हेतौ द्योत्ये तृतीया षष्ठ्यौ-
केन हेतुना वसति। कस्य हेतोः। निमित्तपर्यायप्रयोगे सर्वादेः सर्वा विभक्तयः। सर्वादेस्तृ-
तीयादयः। को हेतुः। किं प्रयोजनम्। कं हेतुम्। केन हेतुना। ज्ञानेन निमित्तेन हरिः सेव्यः॥
ज्ञानाय निमित्ताय। अन्यो नैव प्रथमा। आख्यात उक्ते शासने हि तिङ्कृत्तद्धितसमासैः कारके सम्बन्धे-
ऽप्रथमा स्यात्॥ यदः क्रियते हरिः करोति। कृष्णः कंसं हतवान्। कृष्णेन कंसो हतः। पचनोऽ

६२

सि॰चं॰ पू॰ ६३

ग्निः। दानीयो विप्रः। उपाध्यायः। पचनी स्थाली। प्राप्तानन्दः। ऊढरथः। उपहृतपशुः। उद्धृतौदना
पीताम्बरः। वीरपुरुषः। कौङ्कुमम्। माथुरः। धनवान्। हस्तवती। विग्रहोऽपि समस्यं स्वयं छेत्तुम-
साम्प्रतम्। इतिक्रमादमुना रहस्यबोधितः॥ इति विभक्त्यर्थाः॥ समासश्चान्वयेन नाम्नाम्॥ ना-
म्नामन्वये सति समासो भवति। चकारात्कृत्तद्धितधातुसंज्ञाप्रयोजकमव्यया अपि। पूर्वोऽव्यये-
ऽव्ययीभावः। अव्ययपूर्वपदे सति योऽन्यस्त्वसावव्ययीभावसंज्ञकः समासो भवति। समासप्र-
त्यययोः। समासे वर्त्तमानाया विभक्तेः प्रत्यये च परे लुग्भवति। नामत्वात्स्यादिः। स नपुंसकम्। अव्य-
यीभावो नपुंसकलिङ्गो भवति। नपुंसकस्येति ह्रस्वः। अव्ययीभावात्। विभक्तेर्लुक्। अधिस्त्रि। अ-
तोऽमनतः। अदन्तादव्ययीभावाद्विभक्तेर्लुग्न भवति स्वं वर्जयित्वा मादेशः। कुम्भस्य समीपमुपकुम्भ-
म्॥ वा टाङ्योः। अदन्तादव्ययीभावाट्टाङ्योरम्वा। उपकुम्भम्। उपकुम्भेन वा कृतम्। उपकुम्भ-
म्। उपकुम्भे वा निधेहि। अनतः किम्। उपकुम्भात्। मद्राणां समृद्धिः सुमद्रम्। यवनानां व्यृद्धि-
र्दुर्यवनम्। मक्षिकाणामभावो निर्मक्षिकम्। हिमस्यात्ययोऽतिहिमम्। निद्रा सम्प्रति न युज्यते। ६३

सि॰ चं॰ मू॰ ६४

त्यतिनिद्रम्। हरिशब्दस्य प्रकाश इति इतिहरि। विष्णोः पश्चादनुविष्णु। रूपस्य योग्यमनुरूपम्। अर्थमर्थं प्रति प्रत्यर्थम्॥ शक्तिमनतिक्रम्य करोतीति यथाशक्ति। हरेः सादृश्यं सहरि। सहादेस्सा-दिरिति सहस्य सः। ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठम्। चक्रेण युगपत् सचक्रम्। सदृशः सख्या ससखि। क्षत्राणां सम्पत्तिः सक्षत्रम्। तृणमप्यपरित्यज्य सतृणमत्ति। अग्निग्रन्थपर्यन्तमधीते साग्नि। यथासादृश्ये यथाशब्दस्सादृश्येन समस्यते। यथा हरिस्तथा हरः। अवधारणार्थे यावदिति च॥ अवधारणार्थे यावच्छब्दे प्रयुज्यमाने योऽव्ययस्तयोऽव्ययीभावसंज्ञकसमासो भवति॥ यावन्तः श्लोकाः तावन्तोऽच्युतप्रणामा यावच्छ्लोकम्॥ क्वचिदनव्ययपूर्वपदेऽप्यव्ययीभावः। उन्मत्ता गङ्गा यस्मिन् देशे सोऽयमुन्मत्तगङ्गम्। शाकस्य लेशः॥ शाकप्रति। अक्षेण विपरीतं वृत्तमक्षपरि। शलाकया विपरीतं वृत्तं शलाकापरि। एकपरि। क्वचित्। अपविष्णोः॥ अपविष्णु परिविष्णोः। परिविष्णु। बहिर्वनात्। बहिर्वनम्। प्राग्वनात्। प्राग्वनम्। आमुक्तेः। आमुक्ति। अभ्यग्निम्। अभ्यग्नि। प्रत्यग्निम्। प्रत्यग्नि। वनस्य समीपमुपवनम्। गङ्गामनु। अनुगङ्गम्। ६४

तिष्ठन्ति गावो यस्मिन्काले स तिष्ठद्गु। आयतीगवम्। पारे गङ्गायाः पारेगङ्गम्। मध्ये गङ्गायाः
मध्येगङ्गम्। इत्यादयो निपात्याः। खलेयवा यस्मिन् काले खलेयवम्। द्वौ मुनी वंश्यौ द्वि-
मुनि। त्रिमुनि व्याकरणस्य। सप्त गङ्गाः समाहृताः सप्तगङ्गम्। द्वियमुनम्॥ तद्धिताः॥ समा-
से सति टच् डच् कप् च स्युरिति शेषः भवन्ति। शरदः समीपमुपशरदम्। प्रतिविपाशम्। जराया ज-
रस्। उपजरसम्। अस्मिन्निमित्तस्मृतम्॥ अक्ष्णः परस्मादक्षम्॥ अनः प्रत्ययस्य अनन्तस्य टच् ट-
तिलोपकात्॥ अन्वक्षम्। उपराजम्। क्लीबे वाऽन्लोपश्च। उपचर्मम्। उपचर्म। झयो वा। उ-
पसमिधम्। उपसमित्। नद्यादिभ्यो वा। उपनदम्। उपनदि। समासो तत्पुरुषः। द्वितीयान्ते
पूर्वपदे सति योऽन्यस्य तत्पुरुषसंज्ञः समासो भवति ग्रामं श्रितो ग्रामश्रितः। कृष्णश्रितः। कू-
पपतितः। ग्रामगतः। खट्वारूढः। मुहूर्तसुखम्। दुःखातीतः। ग्रामगामी। अन्नबुभुक्षुः। शङ्कु-
ला खण्डम्। दात्रच्छिन्नम्। मासेन पूर्वो मासपूर्वः। मातृसदृशः। पितृसमः। माषोनम्। वाक्कलहः। आ-
चारनिपुणः। गुडमिश्रितः। आसावरः। हरित्रातः। नखभिन्नः। दध्योदनः। गुडधानाः॥ यूपा-

पदाः कृसूपदाः। अर्थेन नित्यसमासो विशेष्यलिङ्गता। द्विजायायं द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजार्थप-
यः। भूतबलिः। गोहितम्। गोसुखम्। गोरक्षितम्। चौराद्भयम्। चौरभयम्। सुखापेतः। दुःखा-
पोढः। व्याघ्रभीतिः। राज्ञः पुरुषः राजपुरुषः। द्विजयाजकः। देवपूजकः। क्वचित्षष्ठी न सम-
स्यते। नृणां द्विजः। सतां श्रेष्ठः। कारकस्य कार्त्स्न्येन। फलानां सुहितः। इदमेषां शयितम्। अपां-
स्रष्टा। ओदनस्य पाचकः। अधरप्रभृतिभिरेकांशिना समासो नान्यपरत्वम्। राज्यमतिक्रान्तोऽतिरा-
नावमतिक्रान्तोऽतिनौः। पूर्वं भूतो भूतपूर्वः। कायस्य पूर्वः पूर्वकायः अपरकायः अधर-
कायः। उत्तरकायः। अह्नो मध्यं मध्याह्नः सायाह्नः। मध्यरात्रः। पश्चिमरात्रः। अर्धपिप्पली। क्व-
चिन्न। द्वितीयं भिक्षायाः। द्वितीयभिक्षा। भिक्षाद्वितीयम्। तृतीयभिक्षा। भिक्षातृतीयम्॥
चतुर्थभिक्षा। भिक्षाचतुर्थम्। भिक्षातुरीयम्। तुरीयभिक्षा। जीविकां प्राप्तः। प्राप्तजीविकः।
आपन्नजीविकः। जीविकापन्नः। समासे क्वचिद्वैकल्पिकत्वे हेतुः। शराणां वनम्। शरवणम्।
आम्राणां वनम्। आम्रवणम् इक्षुवणम्। शरव्यं वा स्यात्। क्वचिन्न। माषवापिणौ। माषवापिनौ। 

व्रीहिवापाणि। व्रीहिवापानि। व्रीहिवापेण। व्रीहिवापेन। सुरापाणम्। सुरापानम्। अग्नेर्नु-
प्तो गडोऽस्य अग्नौगडः। पात्रेसमिताद्यो निपात्याः। पात्रेसमिताः। गेहेशूरः। गेहेनर्दी। नञ्। न-
ञि पूर्वपदे सति योऽन्वयस्स तत्पुरुषसञ्ज्ञकस्स समासो भवति॥ न॥ समासेनञो नस्यादेशः
धर्म्मविरुद्धोऽधर्म्मः। ज्ञानविरुद्धमज्ञानम्। अन्तरो समासेन जो नु स्यान स्यात्स्वरे अश्वाद-
न्योऽनश्वः। संशयस्याऽसम्भवोऽसंशयः। निरनुबन्धकस्य नानो॥ नाकः। नक्षत्रम्। नञ्ञः
नासत्यौ। नैकधा। चार्थे द्वन्द्वः। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। तत्रेश्वरं गुरुं
च भजस्वेति प्रत्येकमेकक्रियाभिसम्बन्धः समुच्चयः। वटो भिक्षामट गां चानयेति क्रमेणाक्रिया-
द्वयसम्बन्धोऽन्वाचयः। मिलितयोरेकत्रान्वयः इतरेतरयोगः॥ संहतिस्समाहारः। तत्राद्ययोर्न
समासोऽस्यनन्वयात्। द्वन्द्वेऽल्पस्वरप्रधानेकारोकारान्तानाम्पूर्वनिपातः। पटुश्च गुप्तश्च प-
टुगुप्तौ। अग्निश्च मरुच्च अग्निमरुतौ। भोक्तृभोज्यौ। धवखदिरौ। इन्द्राश्वत्थाः। तापसपर्वतौ। ल-
राद्यन्तस्य। ईघ्रकृतोद्देवता द्वन्द्वपूर्वपदस्याकारः। इन्द्राबृहस्पती। अग्नाविष्णू। कचिन्न अग्नि-

वायू। ईदग्नेः स्तोमवरुणयोः। अग्नेः स्तोमादीनां सस्य षः। अग्नीषोमौ। अग्नीवरुणौ॥ समाहा-
रे एकवद्भावः एकत्वे द्विगुद्वन्द्वौ नपुंसकलिङ्गौ भवतः। पाणिपादम्। मार्दङ्गिकपाणविक-
म्। रथिकाश्वारोहम्। पदकक्रमकम्। बदरामलकम्। यूपकुशपलाशम्॥ संख्यापूर्वो
द्विगुः। तद्धितार्थे। पञ्चकपालः। समाहारेऽर्थे द्विगुः। समाहारेऽर्थे द्विगुस्समासो भवति त-
तोऽकारान्ताद् ङीप् प्रत्ययः। दशानां ग्रामाणां समाहारो दशग्रामी। पञ्चाग्नि। क्वचिन्न। पञ्च-
पात्रम्। चतुर्युगम्। त्रिभुवनम्। आवन्तो वा। पञ्चखट्वी। पञ्चखट्वं। बहुव्रीहिरन्यार्थे। अन्यपदार्थे यो-
ऽन्वयस्स बहुव्रीहिस्सञ्ज्ञः। बहुव्रीहौ विशेषणसप्तम्यन्तक्तान्तसर्वादिसंख्यानां पूर्वनिपातः
बहुधनं यस्य स बहुधनः। अस्तिधनः। लम्बकर्णः कण्ठेकालः। बहुगडुः कृतकटः। सर्वश्रि-
यः। द्विपुरुषः। क्वचिन्न। चन्द्रशेखरः। पद्मनाभः। दन्तजातः। ऊरुभिन्नः। क्वचिद्वा। प्रियगुडः
गुडप्रियः। आहिताग्निः। अग्न्याहितः। अस्युद्यतः। उद्यतासिः। नञ्दुस्सुभ्यः प्रजामेधयो-
रसुक्। अप्रजाः। दुर्मेधाः। सुप्रजाः। धर्म्मादिन्। सुधर्म्मा। रूपवती भार्य्या यस्य॥ अन्या-

सि॰ कौ॰ स्त्री॰ पुं॰

र्थे । स्त्रीप्रत्ययान्तस्यान्यार्थे वर्तमानस्य ह्रस्वः । पुंवत्कर्म । पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रीलिङ्गे
परे पूर्वस्योक्तपुंस्कस्य स्त्रीलिङ्गस्य पुंलिङ्गस्येव रूपम् । रूपवद्भार्यः । उक्तपुंस्कस्य किम् ।
खट्वाद्वितीयः ॥ गङ्गाभार्याः । ऊङ्प्रत्ययान्तस्य न । वामोरुभार्यः । पूरणार्थप्रत्ययान्तो द्वितीयादि
र्न । कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । कल्याणीप्रियः । त्वरत्वात्
तरप्कल्प देश्य देशीय रूप पाश प्रत्ययेषु पुंवत् । दर्शनीयतरा । दर्शनीयदेश्या । दर्शनीयपाशा ।
शसि बह्वल्पार्थस्य पुंवत् । बह्वीभ्यो देहि बहुशः । त्वतलोर्गुणवचनस्य । शुक्लाया
भावः शुक्लत्वम् । शुक्लता । कुक्कुट्यादीनामण्डादिषु । कुक्कुट्या अण्डं कुक्कुटाण्डम् । मृगप-
दम् । मृगक्षीरम् । काकशावः । संज्ञापूरण्योश्च । ... पुंवत् । दीप्तिरूपाः ... भार्यो न पुं-
वद्भावः । सर्वा प्रधानमस्येति सर्वमयः । सर्वस्याः ... सर्वकः । यद्वा जाति-
श्च पुंवत् । हस्तिनीनां समूहो हास्तिकम् । दर्शनीयमानी । दर्शनीयामात्मानं मन्यते । अकनाद्धि...
कोपधस्य च । पाचिकाभार्यः । रसिकाभार्यः । संज्ञापूरण्योश्च । दत्ताभार्यः । पञ्च

सीभार्यः। वृद्धिहेतोस्तद्धितस्यारक्तविकारार्थस्य न। स्रौघ्नी भार्यः। अरक्ते किम्। काषायेण रक्ता
कन्था काषायी। काषायी कन्था यस्य स काषायकन्थः। विकारे किम्। हेम्नो विकारो हैमी हैमी
मुद्रिका यस्यासौ हैममुद्रिकः। वृद्धि सति पुंवत्। वैयाकरणभार्यः। स्वाङ्गाच्चेतोऽमानिनि। सुके
शी भार्या यस्य स सुकेशीभार्यः। मानिनि तु। सुकेशमानिनी। जातेश्च न स्त्री पुंवत्। अन्यथा न स्यात्
शूद्राभार्यः। ब्राह्मणीभार्यः। इत्यादि। गोः। गोप्रातिपदिकस्यान्त्यार्थे वर्त्तमानस्य ह्रस्वो भवति॥ पं
च गावो यस्य स पञ्चगुः। संख्यासुपूर्वस्य पादस्यान्त्यलोपः। सहस्रं पादा यस्य स
सहस्रपात्॥ पादः स्थाने तद्धितयस्वरयोरीपीकारे च पदादेशः। सहस्रपदः। व्याघ्रपदी। कुले॥
वैयाघ्रपदः। वैयाघ्रपद्यः। द्विपात्। द्विपादौ। द्विपादः। सुपात्। व्याघ्रपात्॥ साङ्काः। मध्यान्हः।
पूर्वाह्नः॥ नो वा॥ नान्तस्य देश्लोपः स्वरे यकारे च परे। वा गृहणा स्त्री चिन्ता। क्वचिदुपधालोपः।
कोविराजः। कुसमवः। देवगवी परमगवः। राजपुरम्। स्वकपुरम्। सर्व्वपुरम्। वाङ्मनसे। न सिंगा
पथः। अहोरात्रः। द्विनाः। पञ्चधाः। बहुकर्त्तृकः बहुलक्ष्मीकः। स्त्रीपुंसौ। ऋक्सामे। मङ्गेशः। च

द्वौ स्तः। द्व्यायुषम्। त्र्यायुषम्। ग्रामतक्षः। कौटतक्षः। उत्तरसक्थम्। पूर्व्वसक्थम्। अर्द्धखा-
रम्। अर्द्धनावम्। कर्म्मधारयस्तुल्यार्थे॥ पदद्वये तुल्यार्थे एकार्थे निष्ठे सति कर्म्मधारयस्समासो भवा-
ति। कर्म्मधारये पूर्व्वस्पुम्वत्। नीलमुत्पलम्। नीलोत्पलम्। रक्तलता। पुंस्कोकिलः। ब्राह्मणभार्य्या। रक्तभार्य्या।
सुकेशभार्य्या। स्नातानुलिप्तः। एकनाथः। सर्व्वयाज्ञिकाः। जरन्नैयायिकाः। पुराणमीमांसकाः।
नवपाठकाः। केवलवैयाकरणाः। नाम्नश्चहलासमासः। शाकेऽपसर्व्वस्य नाम्नश्च कृदन्तेन सह
तत्पुरुषस्समासो भवति। व्याघ्रः। कच्छपः। कुम्भकारः। शाकपार्थिवादीनाम्मध्यमपदलोपः।
शाकप्रियः पार्थिवः। शाकपार्थिवः। देवपूजको ब्राह्मणो देवब्राह्मणः। सहादेस्सादिः समासेस-
ति सहादेस्सादिरादेशः। सह पुत्रेण सपुत्रः। सहाञ्चतीति सध्र्यङ्। समञ्चतीति सम्यङ्॥ तिरो-
ञ्चतीति तिर्य्यङ्। विष्वग्द्र्यङ्। देवद्र्यङ्। लक्ष्मीर्ज्जाया यस्य स लक्ष्मीजानिः। कुत्सितमन्नं कदन्नम्
। ईषदुष्णम्। कोष्णम्। कवोष्णम्। कदुष्णम्। द्यौश्च भूमिश्च द्यावाभूमी। जाया च पतिश्च जम्प-
ती। दम्पती। मातापितरौ। कुपुरुषः। कापुरुषः। षट् च दश च षोडश। षड् दन्ता यस्य षोडन्।

सि॰ चं॰
पृ॰
७१

प्रत्युक्तं स्वस्तु स्तुधा सूत्रपदात्‌ इत्त्वम्‌। संख्यायाः प्रकारे धा। अनु प्रकाराः बोधा। बहुधा। महा
न्तं ह्रस्वो महेश्वरः। महादेवः॥ खराणां नासिका यस्य स खरणसः। खरणाः। खुरणसः। खुरणाः।
उन्नता नासिका यस्य स उन्नसः। प्रणसः। विगता नासिका यस्य स विग्रः। विख्यः। चतस्रोऽस्र
यो यस्य स चतुरस्रः। प्रोष्ठौ गोः तस्येव पादौ यस्य स प्रोष्ठपदः। प्रगते जानुनी अस्य प्रज्ञुः। संज्ञुः।
ऊर्ध्वज्ञुः। ऊर्ध्वजानुः। ऊर्ध्वद्रुः। बहुव्रीहौ धनुषोऽनङ्‌। अधिज्यधन्वा। शार्ङ्गं धनुरस्य शार्ङ्गधन्वा
उद्गन्धिः। सुगन्धिः। पूतिगन्धिः। सुरभिगन्धिः। द्विदन्‌ चतुर्दन्‌। अतुमन्त्वतीति। सुदन्‌। षड्दन्‌
भद्रदन्‌। कौमुदगन्ध्याः पुत्रः। कौमुदगन्धीपुत्रः। कौमुदगन्धीपतिः। समानं ज्योतिरस्य सज्योतिः। सना
भिः। सनामा। सवयाः। सब्रह्मचारी। सतीर्थ्यः। क्षीरोदः। लवणोदः। शुद्धोदः। पूर्णोदः। दा
रिवाहको वन्नाहकः॥ तृष्णा। निहिमगा तीरस्‌ दक्षिणाला रस्‌॥ इत्यादि। अलुक्‌ क्वचित्‌। क्वचि
त्समासे न ह्रिलन्त्विभक्तेरलुक्‌। कृच्छ्रान्मुक्तः। स्तोकान्मुक्तः। दूरान्मुक्तः। निकटान्मुक्तः। अप्सुयो-
निः। सरसिजम्‌। उरसिलोमा। हृदिस्पृक्‌। कण्ठेकालः। वाचोयुक्तिः। दिशोदण्डः। पश्यतोहरः।

खेशयः। ग्रामेवासः। ग्रामेवासी। चौरस्यकुलम्। ओजसाकृतम्। सहसाकृतम्। अम्भसाकृत
म्। पुंसानुजः। जनुषान्धः। आत्मनापञ्चमः। त्वचिसारः। गविष्ठिरः। युधिष्ठिरः। आत्मनेपदम्।
आत्मनेभाषा। मध्येगुरुः। स्तम्बेरमः। कर्णेजपः। पूर्वाह्णेतरे। पूर्वाह्णेतमे। आमुष्यायणः।
आमुष्यकुलिका। आमुष्यपुत्रिका। मातृपितृभ्यां स्वसुः स्वसुः षः। मातृष्वसा। पितृष्वसा।
मातुः पितुर्भ्यां वा। मातुस्स्वसा। मातुःष्वसा। पितुस्स्वसा। पितुःष्वसा। होतुरन्तेवासी। होतुः
पुत्रः। पितुरन्तेवासी। पितुःपुत्रः। देवानांप्रिय इति च मूर्खे। दिवोदासः। शुनश्शेफः। शुनःपु-
च्छः। इत्यादि तरतमरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्यन्तस्यानेकाचस्य ह्रस्वोभा-
षितपुंस्कस्य॥ ब्राह्मणितरा। ब्राह्मणितमा। ब्राह्मणिरूपा। ब्राह्मणिकल्पा। ब्राह्मणि
चेली। अनीवन्तस्य स्त्रीप्रत्ययान्तस्य वन्तस्यैकस्वरस्य वा ह्रस्वस्तरादौ। ब्रह्मबन्धूतरा।
ब्रह्मबन्धुतरा। स्त्रीतरा। ह्रितः परस्य वा। विदुषितरा। विद्वत्तरा। भवतितरा। भवत्तरा। पचतित-
रा। पचत्तरा। इष्टकेषीकामालानां चिततूलभारिषु ह्रस्वः। इष्टकचितम्। पक्वेष्टकचितम्

इषीकतूलम्। मुञ्जेषीकतूलम्। मालभारी। उत्पलमालभारी। कारे सत्यागदस्य। सत्यङ्कारः। अ-
गदङ्कारः। अस्तोश्च। अस्तुङ्कारः। धेनोर्भव्यायाम्। धेनुम्भव्या। लोकस्य पृणे। लोकम्पृ-
णः। इत्येऽनभ्याशस्य। अनभ्याशमित्यः। भ्राष्ट्राग्न्योरिन्धे। भ्राष्ट्रमिन्धः। अग्निमिन्धः। गि-
लेऽगिलस्य। तिमिङ्गिलः। गिलगिले च। तिमिङ्गिलगिलः। उष्णभद्रयोः करणे
। उष्णङ्करणम्। भद्रङ्करणम्। रात्रेः कृति वा। रात्रिञ्चरः। रात्रिचरः। रात्रिमटः। रात्र्यटः। नहिवृति-
वृषिव्यधिरुचिसहितनिषु क्वौ। पूर्वस्य दीर्घः। उपानत्। नीवृत्। प्रावृट्। मर्मावित्। नी-
रुक्। अभीरुक्। ऋतीषट्। परीतत्। मतौ बह्वचो [illegible]। अमरावती। शरादेश्च। शरावती। अ-
जिरादेर्न। अजिरवती। उपसर्गस्य घञ्यमनुष्ये बहुलम्। दीर्घः। परिपाकः। परीपाकः। परिहासः।
परीहासः। अमनुष्ये किम्। निषादः॥ आनङ् ऋतो द्वन्द्वे। द्वन्द्वे सति [illegible] लोपः। माता च पिता
च पितरौ। [illegible] होता च पोता च होतापोतारौ। नेष्टा च उ-
द्गाता च [illegible]। मातापितरौ। होतापोतारौ। नेष्टोद्गातारौ। पुत्रेऽपि पितापुत्रौ॥ गावश्च गावश्च-

गावश्चमाः। शुक्लश्च शुक्ला च शुक्लञ्च शुक्लम्। सच यश्च तौ यौ वा। दिक्सङ्ख्ये सञ्ज्ञायाम्॥
दिग्वाचिनः सङ्ख्यावाचिनश्च प्रागुक्तास्समानाधिकरणेन सञ्ज्ञायामेव समस्येते स कर्म्मधारय
स्समासः। दक्षिणाग्निः। सप्तर्षयः। सञ्ज्ञायां किम्। पञ्चफलानि। दिक्सङ्ख्ये किम्। पूर्व्वशाखा
। द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गम्। कुक्कुटमयूर्य्याविमे। मयूरीकुक्कुटाविमौ। अर्द्धपिप्प-
ली। द्विगुप्राप्तापन्नालम्पूर्व्वगतिसमासेन। पञ्चकपालः। प्राप्तोजीविकां प्राप्तजीविकः। आप-
न्नजीविकः। अलङ्कुमार्य्यै अलङ्कुमारिः। निष्कौशाम्बिः। अश्ववडवयोर्द्वन्द्वः पूर्व्ववल्लिङ्गः। अश्व
वडवान्। रात्राह्नान्ताः पुंस्येव। अहोरात्रः। पूर्व्वरात्रः। पूर्व्वाह्णः। द्व्यह्नः। पूर्व्वाह्णः। संख्यापूर्व्वं रा
त्रं क्लीवम्। द्विरात्रम्। त्रिरात्रम्। अपथन्तत्पुरुषे क्लीवम्। अपथम्। अर्द्धर्चादयः क्लीवपुंसोः॥
अर्द्धर्चम्। अर्द्धर्चः। ध्वजम्। ध्वजः। तीर्थम्। तीर्थः। एवं शरीरमण्डपयूपदेहदेशाङ्कुशकलश
इत्यादि। आवन्तोत्तरपदो द्विगुर्व्वा। पञ्चखट्वी। पञ्चखट्वम्। अनोनलोपो द्विगुर्व्वा। पञ्च-
तक्षम्। पञ्चतक्षी। पुण्यसुदिनाभ्यामह्नः क्लीवता। पुण्याहम्। सुदिनाहम्। संख्याव्ययाभ्याम्

सि॰ चं॰ स्य पथः क्लीबत्वमन्निपथम् । विपथम् । सामान्ये नपुंसकम् । मृदु पचति । प्रातः कमनीयम् । उप
पू॰ ज्ञोपक्रमान्तस्तत्पुरुषः क्लीबम् उपज्ञोपमान्तोपक्रम्यमाणार्थाः प्राथम्येन चेदाख्यातुमिष्यते
७९ पाणिनेरुपज्ञा पाणिन्युपज्ञम् । नन्दोपक्रमं द्रोणाः । छायान्तस्य पूर्वपदार्थबाहुल्ये । इक्षूणां
छाया इक्षुच्छायम् । राजपर्य्यायपूर्व्वो रक्षःपिशाचादिपूर्व्वश्च सभान्तः । इनसभम् । ईश्वरस
भम् । नेह । राजसभा । रक्षःसभम् । पिशाचसभम् । संघातार्थस्सभान्तः । स्त्रीसभम् । स्त्रीसंघात इत्य
र्थः । सेनासुराछायाशालानिशान्तो वा । ब्राह्मणसेनम् । यवसुरम् । कुड्यच्छायं । गोशालम् ।
श्वनिशम् । पक्षे ब्राह्मणसेनेत्यादि ॥ इति समासप्रक्रिया ॥ अपत्येऽण् ॥ नाम्नोऽपत्येऽर्थेऽ
ण्प्रत्ययः । आदिस्वरस्य ञ्णिति च वृद्धिः । स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिर्ञिति णिति च
तद्धिते । वोऽव् स्वरे । उवर्णस्यौ तद्धिते यकारे स्वरे च । उपगोरपत्यमौपगवः । वैदुषः
वासिष्ठः । गौतमः । भार्गवः । आङ्गिरसो वेदः । और्व्वः । वार्त्रघ्नः । [illegible] । संख्यासम्भद्रपू
र्व्वस्य मातृशब्दस्यान्तस्य उर् भवत्यणि परे । षाण्मातुरः । द्वैमातुरः । साम्मातुरः । भाद्रमातुरः । ७९

सि.चं. शिवादिभ्य। शैवः। गाङ्गः। अत इञनृषेः॥ अकारान्तान्नाम्नोऽनृषिशब्दादपत्ये इञ्। दैव-
पू. दैवदत्तिः। श्रैधरिः। दाशरथिः। पौरन्दरिः। बाह्वादिभ्यश्च॥ बाहोरपत्यं बाहविः। औडुलोमिः। गा-
७७ र्गिः। वैदिः। नाडिः। कौञ्जिः। सुधातृव्यासवरुडनिषादचण्डालबिम्बानामकङ् च। सुधातुर-
पत्यं सौधातकिः। वैयासकिः। वारुडकिः। नैषादकिः। चाण्डालकिः। बैम्बकिः। यञायनणीयसीया
गर्गनडात्रिस्त्रीपितृष्वस्रादिभ्यः। गर्गादेर्यञ् नडादेः फक् अत्र्यादेः स्त्रीप्रत्ययान्ताच्च ढक्
पितृष्वस्रादेश्छणो योऽपत्येऽर्थे। गार्ग्यः। वात्स्यः। कात्यः। बाभ्रव्यः। आवट्यः। माण्डव्यः। पौ-
तिमाष्यः। नाडायनः। चारायणः। गार्ग्यायणः। वात्स्यायनः। आमुष्यायणः। आत्रेयः। कापे-
यः। नैधेयः। गाङ्गेयः। माहेयः। गौधेयः। नादेयः। कल्याण्यादेरिनङ् च। काल्याणिनेयः॥
कौलटिनेयः। गोधादेरारगोरणौ। गौधारः। नादारः। पाण्डारः। गौधेरः। नाटेरः। पाण्डेरः।
पैतृष्वस्रीयः। मातृष्वस्रीयः। पितृष्वस्रादेर्यण्छिलोपः। पैतृष्वसेयः। मातृष्वसेयः। पा-
ण्डोर्ड्यण्। पाण्ड्यः। चटकादेरैरक्। चटकस्यापत्यं चाटकैरः। स्त्र्यपत्ये लुक्। चटका। लु- ७

सि० कौ०
पू०
७८

बहुत्वे क्वचित्। प्रत्युदाहरणम्। गार्ग्याः। वासिष्ठाः। भार्गवाः। आङ्गिरसाः। वात्स्याः। कौत्साः। गौतमाः। आ-
त्रेयः। विदाः। अङ्गाः वङ्गाः। कलिङ्गाः। विदेहाः। स्त्रियामवन्तिकुरुकुन्तिशूरसेनादिभ्योऽबहु-
त्वेऽपि। अवन्ती। कुन्ती। कुरूः। शूरसेनी। देवते समर्थे। देवतार्थे सद्गर्भे चोऽणस्याणश्च प्रत्य-
याः। इन्द्रो देवताऽस्यैन्द्रम्। सौम्यम्। आग्नेयम्। गृहमेधीयम्। वास्तोष्पतीयम्। अग्नीषोमीय-
म्। मरुत्वतीयम्॥ अपोनपादपांनपातोरपोनप्तृअपांनप्त्रादेशौ घच्छयोः परतः। अपोन-
प्त्रियम्। अपोनप्त्रीयम्। अपांनप्त्रियम्। अपांनप्त्रीयम्। प्राग्दक्षरथः। महेन्द्र देवताऽस्य माहे-
न्द्रम्। कः प्रजापतिर्देवताऽस्य कायम्। क्वचित् द्वयोः पूर्वोत्तरपदयोः स्वरयोः क्वचिद्वृद्धिर्भवति
नित्याति। आग्निमारुतम्। अग्नेर्द्विष्टो। वृद्धिमत्युत्तरपदे अग्नेरिदादेशः स्यात्। आग्निवारुणम्॥
सौहार्दम्। सौभागिनेयः। सौभाग्यम्। साक्तुसैन्धवः। आनुयातिकम्। ऐहलौकिकम्। पारलौकि-
कम्। पौर्वशालिकम्॥ इति तौ वा॥ उक्ता वक्ष्यमाणाश्च प्रत्यया वितौ वाच्यलीयः। श्वशुरस्यापत्यं
श्वाशुर्यः। पित्र्यम्॥ कालम्। भयवलम्। कुल्यम्। तरीयम्। खलीयम्। नदीयम्। अन्यस्तु तुक्। अ-

सि॰चं॰ न्यदीयम्। पितुर्भ्रातरि व्यः। पितुर्भ्राता पितृव्यः॥ मातुर्भ्रातरि डुलः॥ मातुलः॥ मातृपितृभ्यां पि-
पू॰ तरि मातरि च डामहच्। मातुः पिता मातामहः॥ पितामहः॥ मातुर्माता मातामही॥ पितामही॥ अवे
७९ र्दुग्धे सोढदूसमरीसाः॥ अवेर्दुग्धम्। अविसोढम्। अविदूसम्। अविमरीसम्॥ तिलान्निष्फलात्पि-
ञ्जपेजौ॥ निष्फलस्तिलस्तिलपिञ्जः॥ तिलपेजः॥ कारकात् क्रियायुक्ते॥ कारकादर्थे रो मत्वर्थात्
क्रियायुक्ते कर्तरि कर्म्मणि च। कुंकुमेन रक्तः कौङ्कुमम्। वस्त्रेण परिवृत्तो वास्त्रो रथः॥ काम्बलः॥ द्वैपः
वैयाघ्रः॥ पाण्डुकम्बलादिनिः। पाण्डुकम्बलेन सम्वीतः पाण्डुकम्बली रथः॥ वशिष्ठेन दृष्टं वा-
शिष्ठं साम। कालेयम्। वररुचिना कृतो वाररुचो ग्रन्थः। मनुना प्रोक्तो मानवो धर्म्मः। मथुराया आ-
गतो माथुरः। ग्रामादागतो ग्राम्यः। धुरं वहतीति धुर्य्यः॥ धौरेयः॥ सर्वधुरीणः॥ एकधुरीणः॥ मुखपार्श्वतसो-
र्लोपश्च। मुखतो भवं मुखतीयम्। पार्श्वतीयम्। देवस्वराजजनपराणां कुक् च। देवकीयम्।
स्वकीयम्। राजकीयम्। जनकीयम्। परकीयम्। मध्यान्मः॥ मध्यमः॥ हेमन्तस्य वा तलोपोऽणि॥
हैमनम्। हैमन्तनम्। चिरपरुत्परारिभ्यस्त्नः॥ चिरत्नम्। परुत्नम्। परारित्नम्। अग्रादिप- ७९

स्यादन्ताड्डिमः। अग्रिमम्। आदिमम्। पश्चिमम्। अन्तिमम्। हेतुमनुष्येभ्यो वा रूप्यमयटौ। समा
दागतम् समरूप्यम्। सममयम्। समीयम्। देवदत्तमयम्। देवदत्तरूप्यम्। देवदत्तीयम्। छगलि
नो ढेयिनः। छागलिना प्रोक्तमधीयते छागलेयिनः। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयो
र्णिनिः। पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणो भिक्षवः। शैलालिनो नटाः। कर्मन्दकृ
शाश्वादिनिरन्तविश्वे। कर्मन्दिनः। कृशाश्विनः। त्रपुजतुनोः षुक् विकारे। त्रापुषम्। जातुष-
म्। शम्याः ष्लञ्। शामीली स्रुक्। शालियवयोरीकण् ग्रहणे। शालीकः यावीकः। विंशति त्रिं-
शद्भ्यां ड्वुन् वा। विंशकः। विंशतेस्तिलोपो डिति। त्रिंशकः। विंशतिकः। त्रिंशत्कः। कर्मण
उकञ्। कर्मणि प्रभवति कार्मुकम्। मनोर्जातावपत्ये ष्यञणौ। मनोरपत्यं मनुष्यः। मानु
षः। जातौ किम्। मानवः। केनेयकाः। कारकाल्क ईन ईय इय इक इत्येते प्रत्यया भवन्ति क-
र्तरि कर्मणि चोक्तवत्स्य मार्गार्थेषु चरणतो वा। क्रममधीते क्रमकः। पदकः। ग्रामादागत
स्तत्र जातो वा ग्रामीणः। सध्रीचीनः। समीचीनः। तिरश्चीनः। कुलस्यापत्यं कुलीनः। महाकु-

सि॰ कौ॰ पृ॰ ८१

कलीनः । आढ्य कुलीनः ॥ क्वचिद्युलोपः । कन्याया अपत्यं कानीनः । कात्यस्येमे कातीयाः छा-
त्राः । गार्गीयाः । रेवत्या अपत्यं रैवतिकः । पुष्येण युक्ता पौर्णमासी । पौषी । तैषी । क्षत्रस्यापत्यं-
क्षत्रियः । शुक्रो देवतास्य शुक्रियम् । इन्द्रस्य लिङ्गमिन्द्रियम् । असैर्दीव्यतीत्यासिकः । कु-
द्दालेः खनति कौद्दालिकः । हलम्बहति हालिकः । शब्दङ्करोति शाब्दिकः । दार्दुरिकः । धर्म्मं
चरति धार्म्मिकः । अधार्म्मिकः । पक्षिणो हन्ति पाक्षिकः । शाकुनिकः । तैत्तिरिकः । मात्स्यिकः । मै-
निकः । मार्गिकः । सारङ्गिकः । पुराणमधीते पौराणिकः । ऐतिहासिकः । वैदिकः । पील्वादिकर्णा-
दिभ्यः कुणजाहचौ पाकमूलयोः । पीलूनां पाकः । पीलुकुणः । कर्णस्य मूलं कर्णजाहम् । पक्षाति-
मूलौ । पक्षस्य मूलं पक्षतिः । चञ्चुचणौ वित्ते । विद्यया वित्तो विद्याचञ्चुः विद्याचणः । वेः शालच्छङ्-
कटौ । विस्तृतं विशालम् । विशङ्कटम् । संप्रोदश्च कटच् । संकटम् । प्रकटम् । उत्कटम् । अ-
लाबूतिलोमाभङ्गाभ्यो रजसि । अलाबूनां रजो अलाबूकटम् । तिलकटम् । उमाकटम् । भङ्गाक-
टम् । गोष्ठादयः स्थानादिषु पशुनामभ्यः । गवां स्थानं गोगोष्ठम् । अश्वगोष्ठम् । संघातविकटः । अवीनां संघा-

तोऽविकटः। विस्तारे पटच्। अविपटः। द्वित्वे गोयुगच्। द्वावुष्ट्रौ उष्ट्रगोयुगम्। षट्त्वे षड्गवच्। अ-
श्वषड्गवम्। स्नेहे तैलच्। तिलतैलम्। सर्षपतैलम्। भवने क्षेत्रे शाकटशाकिनौ। इक्षूणां
भवनं क्षेत्रं इक्षुशाकटम्। इक्षुशाकिनम्। अवात्कुटारकटौ। अवाचीनोऽवकुटारः। अवक-
टः। नासिकायां नते संज्ञायां टीटन्नाटज्भ्रटचोऽवात्। नासिकाया नतमवटीटम्। अवनाटम्।
अवभ्रटम्। तद्योगान्नासिकावटीटा। पुरुषोऽवटीटः। नेर्बिडज्बिरीसचौ। निबिडम्। निबिरीसम्।
इनच्पिटच्काः प्रत्यया नेश्चिकचिचिकादेशाः। चिकिनम्। चिपिटम्। चिक्कम्। क्लिन्नस्य चिल्
पिलचुला लप्रत्ययोऽस्य च चक्षुषी इत्यर्थे। क्लिन्ने चक्षुषी अस्य चिल्लः पिल्लः। चुल्लः। उपाधि-
भ्यामासन्नारूढयोस्त्यकन्। पर्वतस्यासन्ना भूमिरुपत्यका। आरूढा अधित्यका। कर्म्मण्यठच्
घटत इत्यर्थे। कर्म्मणि घटते कर्म्मठः। साक्षाद्द्रष्टरि संज्ञायामिनिः। साक्षाद्द्रष्टा साक्षी। इष्टा-
दिभ्य इनिरनेनेत्यर्थे। इष्टमनेन इष्टी। अधीती। हैयङ्गवीन श्रोत्रिय क्षेत्रिय अनूप-
दीत्यादयो निपात्याः। ह्योगोदोहे ह्यवे हैयङ्गवीनम्। छन्दोऽधीते श्रोत्रियः। परक्षेत्रे च-

सि॰ चं॰ कित्त्वः सौत्रिकः। अनुपदमन्वेष्टानुपदी॥ आख्यातान्व्ययसर्वादिष्टेः प्रागकः। पचतकि
पू॰ । उच्चकैः। नीचकैः। सर्वके। अश्वकम्। असकौ। त्वकम्। अहकम्। त्यतनौ। भवाद्यर्थे त्यत-
८३ नौ प्रत्ययौ स्तः। अव्ययात्। कुत्र भवः कुत्रत्यः। कुतस्त्यः। अमात्यः। इहत्यः। अव्ययस्य त-
द्धितयस्वरयोष्टिलोपः। बहिस् बाह्यः। स्त्र्यलवर्णेभ्यस्तोकः। पौनःपुन्यम्। पौनःपुनि-
कः। दाक्षिणात्यश्चात् पुरस्त्यप्। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः। ऐषमस्त्यम्। ऐषमस्त-
नम्। ह्यस्ति कस्त्यो वा टिकत्। अद्यतनः। ह्यस्तनः। श्वस्तनः। सनातनः। सदातनः।
पुरातनः। दोषातनः। सायन्तनः। चिरन्तनः। प्राह्णेतनः। स्वार्थे पि। प्रज्ञादिभ्यश्चाण्। प्र-
ज्ञश्चा स्वार्थे स्युः। देवत्तल् एव दैवत्तकः। चौरः। वय एव वायसः। रक्ष एव राक्षसः। चतु-
र्वर्णाश्चातुर्वर्ण्यम्। समीपमेव सामीप्यम्। चत्वारो वेदाश्चातुर्वैद्यम्। मनुरेव मानुः।
नातुराश्रम्यम्। त्रैलोक्यम्। अनन्त एवानन्त्यम्। अवसथ एवावसथ्यम्। इतिह एवैति ८
ह्यम्। भेषजमेव भैषज्यम्। भाग रूपनामभ्यो धेयः। भाग एव भागधेयम्। नामधेयम्। रू-

प्रथेयम्। हैलान्तः। हैल यन्तु हैलता। स्नूहितकः। स्नूहैन स्नूहितिका। सख्यौ पृथुं साधात्। ग्रन्थात्वान्तु-
न् कृत्स्ना। कृत्स्ना। अण्यौ नयोर्युक्त दर्शनयोर्युक्ता का त्याकौ। त्याकर्थयो ल्लव कमसकौ। युव-
योर्युक्ता कन्यार्यं योर्युक्ता कः। यौष्मा कीनः। आवयो रस्मा कन्यार्यं आस्मा कः। आस्माकीनः। त-
वायन्ता वकः। ममाय मामकः। तावकीनः। मामकीनः। वतुल्यो। सादृश्येऽर्थे वत्प्रत्ययः। ब्राह्म-
ण तुल्यं ब्राह्मणवत्। ब्राह्मणवत्। क्षत्रियवत्। मथुरायामिव मथुरावत्। पाटलिपुत्रस्येव प्राकारः
पाटलिपुत्रवत्। चैत्रस्येव चैत्रवत्। मैत्रस्य गृहम्। अर्हेऽपि विधिमर्हति विधिवत्। भावे त्वतलौ स्तः।
भावः स्वप्रवृत्तिनिमित्तं भावस्तत्र वाच्ये एतौ स्तः। त्वान्तं क्लीबम्। ब्राह्मणता। ब्राह्मणत्वम्। ब्राह्म-
ण्यम्। शुक्लत्वम्। शौक्ल्यम्। वैदुष्यम्। कर्मण्यपि। ब्राह्मणस्य कर्म ब्राह्मण्यम्। राज्यम्। स्तै-
न्यम्। लोहितादिडिमन्। भावे वा। लोहिमा। लोहितता। लोहितत्वम्। लौहित्यम्। अणिमा
। लघिमा। भावे णापि। लाघवम्। गौरवम्। यौवनम्। शैशवम्। मौनम्। हौत्रम्। औद्गात्रम्। म-
हतो भावो महिमा। ऋ र ऋलमनि। हलादेर्लघोर्ऋकारस्य रेफो भवति इमनि इष्ठे ईयसौ च। पृथो-

भावः प्रथिमा। म्रदिमा। क्रशिमा। दृढिमा। लघोः किम् लघिमा। ह्रसादेः किम्। ऋजिमा। बहो-
र्लोपो भूश्च बहोः। बहोः परस्य इमनादीनामिवर्णस्य लोपो बहोर्भूरादेशश्च। बहोर्भावो
भूमा। त्वेनाद्योनलोपश्च त्वेनस्य कर्म्मभावो वाच्ये यत्। समूहेऽर्थेऽपि। मयूराणां समूहो मा
यूरम्। कौशिकम्। शौनम्। कैदारिकम्। गाणिक्यम्। तद्धितस्य स्वरयोः पूर्ववत्। हास्तिकम्।
गार्भिण्यम्। ग्रामता। जनता। बन्धुता। पाश्या। वातस्या। खल्या। गव्या। वाड्डकम्। कैदार्य्यम्
कावचिकम्। ब्राह्मण्यम्। वाडव्यम्। माणव्यम्। गजता। सहायता। पश्वांङ्गणा। पर्शूनां समू
हः पार्श्वम्। सानुकम्। धैनुकम्। रथ्या। खलगोरथेभ्य इनित्रकट्याः। खलिनी। गोत्रा। रथक-
ट्या। हिते चैते प्रत्ययाः। सूर्याय हितः। सूर्यः। आत्मनीनः। विश्वजनीनः। मातृभोगीनः। अ-
पूपाय हितोऽपूपीयः। अपूप्यः। आमिक्षीयम्। शांकव्यम्। गव्यम्। हविष्यम्। खल्यम्। यव्य-
म्। नोवस्य उवां च दीर्घः। शुने हितं शून्यम्। शुन्यम्। ऊधसो नः। ऊधन्यः। अजाविभ्यां थ्यः। अ
जथ्या। अविथ्या। अस्त्यर्थे मतुः। नाम्नः। गावोऽस्यास्मिन्वा सन्ति गोमान्। श्रीर्विद्यतेऽस्य- ८५

सं·चं·
पृ·
८६

श्रीमान् विदुष्मान्। गोमती। इन्ठकौ मत्वर्थे। नाम्नोऽदन्तात् स्यातां क्रमशः शिखादेः अयम्। दण्डिकः
। धनिकः। मान्तोपधाद्विनोर्मान्तोपधावर्णान्तावर्णोपधाज्झयन्ताच्च मतोर्वत्वम्। किम्वा-
न्। लक्ष्मीवान्। धनवान्। विद्यावान्। यशस्वान्। भास्वान्। संज्ञायां यवादेर्न। यवमान्। भू-
मिमान्। तडितादिभ्यश्च। तडित्वान्। विद्युत्वान्। मायी। व्रीही। मायिकः। लोमपामपिच्छा-
दिभ्यः शनेलाः। लोमशः। गिरिशः। पामनः। दद्रुणः। अङ्गना। लक्ष्म्या अच्च। लक्ष्मणः। वि-
षु इत्युत्तरपदलोपश्चाकृतसन्धेः। विषुणः। पिच्छिलः। तुन्दिलः। फेनिलः। सिध्मादेर्लः।
सिध्मलः। चूडालः। कुमुदनडवेतसेभ्यो ड्मतुः। कुमुद्वान्। नड्वान्। वेतस्वान्। महिषात् डमतुः।
महिष्मान् देशः। नडशादाद् ड्वलः। नड्वलः। शाड्वलः। शिखाया वलः। शिखावलः। नडादीना-
मीये कुक्। नड्कीयम्। कुञ्चाया ह्रस्वत्वञ्च। कुञ्चकीयम्। शृङ्गवृन्दाभ्यामारकः। शृङ्गार-
कः। वृन्दारकः। फलबर्हाभ्यामिनः। फलिनः। बर्हिणः। मलादिनः। मलिनः। ईमसश्च। मली-
मसः। हृदयादालुः। हृदयालुः। शीतोष्णतृप्रेभ्यस्तदसहने। शीतं न सहते शीतालुः। उष्णा- ८६

लुः । तृप्रात्तृप्रेः स्वन्न सहते तृप्रालुः । हिमाच्चेलुः । हिमन्न सहते हिमेलुः । बलादूलः । बलन्न स-
हते बलूलः । वातात्समूहे च । वातन्न सहते वातस्य समूहो वा वातूलः । तः पर्वमरुद्भ्याम् । पर्व-
तः । मरुत्तः । ऊर्णाहंशुभंभ्यो युः । ऊर्णायुः । अहंयुः । शुभंयुः । स्वाद्मिन्नैश्वर्ये स्वमैश्वर्यमस्या-
स्तीति स्वामी । वातातीसारपिशाचेभ्यः कुक् च । वातकी । अतीसारकी । पिशाचकी ।
ज्योत्स्नादिभ्योऽण् । ज्यौत्स्नः । तामिस्रः । तापसः । सैकतः । शार्करः ॥ ऊषशुषिमुष्कमधुखमु-
खकुञ्जनगपांसुपाण्डुभ्यो रः । ऊषरः । शुषिरं । मुष्करः । मधुरः । खरः । मुखरः । कुञ्जरः । नगरः
। पांसुरः । पाण्डुरः । कच्छ्वा ह्रस्वश्च । कच्छुरः । द्युद्रुभ्यां मः । द्युमः । द्रुमः । केशादिभ्यो वः । के-
शवः । मणिवः । हिरण्यवः । अर्णसो लोपश्च । अर्णवः । रजःकृष्यासुतिपरिषद्भ्यो वलः । रज-
स्वला । कृष्यादीनां वले दीर्घः । कृषीवलः । आसुतीवलः । परिषद्वलः । अन्येभ्योऽपि । भ्रातृव-
लः । पुत्रवलः । दन्तावलः । बन्धुवलः । वलि वटि भ्यां भः । वलिभः । वटिभः । एतत्किमिदंयत्तद्भ्यो
परिमाणे वतुः । यत्तदेतदां वतौ यावान् । तावान् । एतावान् । किम इदमश्च वतोर्वस्य घः । कियान् । इयान्

कृपदयोर्दस्य यः स्यात्। श्रद्धावेलुः। श्रद्धालुः। कृपालुः। दयालुः। औन्नत्ये दन्तादुरच्। द-
न्तुरः। अस्मायामेधास्रजो विनिः। तपस्वी। ओजस्वी। वर्चस्वी। यशस्वी। तेजस्वी। मायावी।
मेधावी। स्रग्वी। आमयस्योपसंख्यानं दीर्घश्च। आमयावी। वाचो ग्मिनिः। वाग्मी। आलाटौ कुत्सितभाषिणि। वाचालः
। वाचाटः। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। ईषदसमाप्तः सर्वज्ञः सर्वज्ञकल्पः। पटुदे-
श्यः। विद्वद्देशीयः। पचद्देशीयः। बहुर्वा उक्तार्थे सर्वमेव। ईषदूनः पटुः। बहुपटुः। प्रकारे
जातीयः। पटुप्रकारः पटुजातीयः। कुटीशमीशुण्डाभ्यो रो ह्रस्वत्वे। ह्रस्वा कुटी कुटीरः। श-
मीरः। शुण्डारः। कुत्वा डुपः। ह्रस्वा कुतूः। कुतुपः। कासूगोणीभ्यां ष्टरः। ह्रस्वा कासूः। कासू-
तरी। गोणीतरी। वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे। तनुर्वत्सः। वत्सतरः। उक्षतरः। अश्वतरः। ऋष-
भतरः। देवतान्तात्तादर्थ्ये यः। अग्निदेवतायै इदमग्निदेवत्यम्। पादार्घाभ्यां च। पादार्थमुद-
कम् पाद्यम्। अर्घ्यम्। नवस्य नू आदेशस्त्नप्तनप्खाश्च प्रत्ययाः। नूत्नम्। नूतनम्। नवीनम्।
पुराणे प्रान्नश्च। प्रणम्। प्रत्नम्। प्रतनम्। प्रीणम्। अतिशय इह मातिश्यम्। प्रशंसायां रूपः

।प्रशस्तो वैयाकरणो वैयाकरणरूपः। कुत्सायां भ्याप्रः। कुत्सितो भिषक् भिषक्पाशः। भूत
पूर्वे चरट्। पूर्वं दृष्टो दृष्टचरः। दृष्टचरी आढ्यचरी। प्राचुर्य्य विकारप्राधान्यादिषु मयट्। अन्न
प्रचुरमन्नान्नमयो यज्ञः। मृन्मयो घटः। स्त्रीमयो जाल्मः। अमृतं स्वरूपमस्या अमृतमयश्चन्द्रः
।आम्रस्य विकारोऽवयवो वा आम्रमयम्। शरमयम्। गोः पुरीषे। गोमयम्। न सन्धिय्वोर्व्युद्
च। सन्धिजयोर्यकारवकारयोः स्थाने न स्वरस्य न वृद्धिः किन्तु तयोर्व्युडागमो यस्येद च-
स्येति। पश्चाद्वृद्धिः। व्याकरणमधीते वेत्ति वा वैयाकरणः। स्वश्वस्येदं सौवश्वः। व्यासस्यापत्यं वै-
यासकिः। द्वारादीनाञ्च। द्वारादीनां सम्बन्धिस्वरस्य न वृद्धिः किन्तु तयोर्व्युडागमः। द्वारे नियुक्तो दौवा-
रिकः। स्वलसस्येदं सौवलसम्। सौवरम्। शौवम्। सौवग्रामिकः। नैयग्रोधम्। सौवानुकूल-
म्। शौवस्तिकम्। तूलो जातोऽर्थे। लज्जा जाता अस्य लज्जितः। फलितः। तारकितः। तरतमेयसि-
ष्ठाः प्रकर्षे। अतिशयेन गुरुः गुरुतरः। गुरुतमः। ईयस्विष्ठौ डितौ। अतिशयेन लघुः लघी-
यान्। लघिष्ठः। गुर्व्वादेर्लिङ्गे गरत्वगरादिकं लोपश्च। गुरोर्भावो गरिमा। अतिशयेन गुरु-

गरिष्ठः । गरीयान् । प्रियस्य भावः प्रेमा । अतिशयेन प्रियः प्रेष्ठः । प्रेयान् । अतिशयेन स्थूलस्य स्थविष्ठः स्थवीयान् । अतिशयेन प्रशस्यः श्रेष्ठः । श्रेयान् । दीर्घः । द्राघिष्ठः । द्राघीयान् ॥ स्थिरः । स्थेष्ठः । स्थेयान् । स्फिरः । स्फेष्ठः । स्फेयान् । उरुः । वरिष्ठः । वरीयान् । बहुलः । बंहिष्ठः । बंहीयान् । वृद्धः । वर्षिष्ठः । वर्षीयान् । तृप्रः । त्रपिष्ठः । त्रपीयान् । वृन्दारकः । वृन्दिष्ठः । वृन्दीयान् । दूरः । दविष्ठः । दवीयान् । युवा । यविष्ठः । यवीयान् । युवाल्पयोः । कन् वा । कनिष्ठः । कनीयान् । अल्पिष्ठः । अल्पीयान् । कनिष्ठः । कनीयान् । ह्रस्वः । ह्रसिष्ठः । ह्रसीयान् । क्षिप्रः । क्षेपिष्ठः । क्षेपीयान् । क्षुद्रः । क्षोदिष्ठः । क्षोदीयान् । अन्तिकः । नेदिष्ठः । नेदीयान् । बाढः । साधिष्ठः । साधीयान् । ईलोपो ज्याप्रश्लादीयसः । ज्या प्रश्लात्परस्य यस ईकारस्य लोपः । अतिशयेन वृद्धः प्रशस्यो वा ज्यायान् । ज्येष्ठः । बहोरिष्ठेर्यिः बहोरुत्तरस्येकारस्य यिरादेशो बहोर्भूश्च । भूयिष्ठः । भूयान् । किमोऽत्याद्यव्ययान्तात्तरतमयोरामद्रव्यप्रकर्षे । किन्तराम् । किन्तमाम् । कुतस्तराम् । कुतस्तमाम् । उच्चैस्तराम् । गायति । उच्चैस्तमाम् । पचतितराम्

सि॰चं॰ पू॰ ८६ ।प्रशस्तो वैयाकरणो वैयाकरणरूपः। कुत्सायाम्पाशप्। कुत्सितो भिषक् भिषक्पाशः। भूत
पूर्वे चरट्। पूर्वन्दृष्टो दृष्टचरः। दृष्टचरी। आढ्यचरी। प्राचुर्य्यविकारप्राधान्यादिषु मयट्। अन्न
प्रचुरमत्रान्नमयो यज्ञः। मृन्मयो घटः। स्त्रीमयो जाल्मः। अमृतं स्वरूपमस्या अमृतमयश्चन्द्रः
।अश्मस्य विकारोऽवयवो वा अश्ममयम्। आम्रमयम्। गोः पुरीषे। गोमयम्। न सन्धिय्वोर्व्युट्
च। सन्धिजयोर्यकारवकारयोः स्थाने न वृद्धिः किन्तु तयोर्व्युडागमो यस्येड् व-
स्योट्। पश्चाद्वृद्धिः। व्याकरणमधीते वेद वा वैयाकरणः। स्वश्वस्येदं सौवश्वः। व्यासस्यापत्यं वै
यासकिः। द्वारादीनाञ्च। द्वारादीनां सम्बन्धिस्वरस्य न वृद्धिः किन्तु तयोर्व्युडागमः। द्वारे नियुक्तो दौवा-
रिकः। व्यल्कसस्येदं वैयल्कसम्। सौवरम्। शौवम्। सौवग्रामिकः। नैयग्रोधम्। सौवादुमृदव
म्। सौवस्तिकम्। इतो जातार्थे। लज्जा जातास्य लज्जितः। फलितः। तारकितः। तरतमयौ विशि
ष्टाः प्रकर्षे। अतिशयेन शुक्लः शुक्लतरः। शुक्लतमः। ईयस्विष्ठौ डितौ। अतिशयेन लघुर्लघी
यान्। लघिष्ठः। गुर्व्वादेरिष्ठेमेयस्सु गरादिश्च लोपश्च। गुरोर्भावो गरिमा। अतिशयेन गुरु- ८६

गरिष्ठः। गरीयान्। प्रियस्य भावः प्रेमा। अतिशयेन प्रियः प्रेष्ठः। प्रेयान्। अतिशयेन स्थूल-
स्थविष्ठः स्थवीयान्। अतिशयेन प्रशस्यः श्रेष्ठः। श्रेयान्। दीर्घः। द्राघिष्ठः। द्राघीयान्॥
स्थिरः। स्थेष्ठः। स्थेयान्। स्फिरः। स्फेष्ठः। स्फेयान्। उरुः। वरिष्ठः। वरीयान्। बहुलः। बंहि-
ष्ठः। बंहीयान्। वृद्धः। वर्षिष्ठः। वर्षीयान्। तृप्रः। त्रपिष्ठः। त्रपीयान्। वृन्दारकः। वृन्दिष्ठः।
वृन्दीयान्। दूरः। दविष्ठः। दवीयान्। युवा। यविष्ठः। यवीयान्। युवाल्पयोः। कन्। कनिष्ठः।
कनीयान्। अल्पिष्ठः। अल्पीयान्। कनिष्ठः। कनीयान्। ह्रस्वः। ह्रसिष्ठः। ह्रसीयान्। क्षिप्रः।
क्षेपिष्ठः। क्षेपीयान्। क्षुद्रः। क्षोदिष्ठः। क्षोदीयान्। अन्तिकः। नेदिष्ठः। नेदीयान्। बाढः। सा-
धिष्ठः। साधीयान्। ईल्लोपो ज्यादादीयसः। ज्यादुत्तरस्य ईयस ईकारस्य लोपः। अ-
तिशयेन वृद्धः प्रशस्यो वा ज्यायान्। ज्येष्ठः। बहोरिष्ठे र्यिः बहोरुत्तरस्येकारस्य यिट् लो-
पश्च भूश्च। भूयिष्ठः। भूयान्। किमोऽव्ययात्तृच्या तातर तमयोराम् द्रव्यप्रकर्षे। किंतरा-
म्। किन्तमाम्। कुतस्तराम्। कुतस्तमाम्। उच्चैस्तराम्। गायति। उच्चैस्तमाम्। पचतितराम्।


। पचतितमाम्। पठतितराम्। पठतितमाम्। द्रव्यप्रकर्षे तु उच्चैस्तमस्तरुः। परिमाणे दघ्न
द्वयसट्मात्रचः। जानुदघ्नम्। शिरोद्वयसम्। पुरुषमात्रम्। पुरुषहस्तिभ्यामण् च। पौरु
षम्। हास्तिनम्। वतुबन्तात्स्वार्थे द्वयसट्मात्रचौ। तावद्द्वयसम्॥ तावन्मात्रम्॥ द्वयो
र्बहूनां चैकस्य निर्धारणे किमादिभ्यो डतरडमचौ भवतः। कतरः। भवतां कः
कतमः। भवतोर्यतरस्तादृक् ततरः उद्... याणु। संख्येयविशेषावधारणे द्वेस्तीयः। द्वयोः
पूरणो द्वितीयः। त्रेस्तृश्च। तृतीयः। षट्कतिकतिपयचतुरां थुक्। षष्ठः। कतिथः। कतिपय
थः। चतुर्थः। चतुरश्छयतावाद्यक्षरलोपश्च। तुर्यः। तुरीयः। पञ्चादेर्मट्। पञ्चमः। सप्तमः। एकादशा-
देर्डट्। एकादशः। द्वादशः। द्व्यष्टनोरात्वं संख्यायामनुत्तरपदे। द्वादशः। त्रेस्त्रयः। त्रयोदशः।
चतुर्दशः। पञ्चदशः। षोडशः। सप्तदशः॥ विंशत्यादेर्वा तमट्। विंशतितमः। एकेनोना विं-
शतिः एकोनविंशतिः। एकोनविंशतेः संख्यापूरक एकोनविंशतितमः। विंशतेस्तिलोपो
डिति। विंशः। त्रिंशत्तमः। त्रिंशः। द्वाभ्यामधिकानां अशीतिः द्व्यशीतिः। द्व्यशीतेः संख्यापूरको-

त्र्यशीतितमः। द्विचत्वारिंशत्तमः। पञ्चाशत्तमः। षष्ट्यादेरसङ्ख्यादेः पूरणः षष्टितमः। सप्तति-
तमः। नवतितमः। शतादेर्नित्यम्। शततमः। संख्यायाः प्रकारे धा। द्विधा। त्रिधा। चतुर्धा
द्व्यधा द्वित्रिभ्यामेधा धमुञ्वा। द्वेधा। त्रेधा। द्वैधम्। त्रैधम्। एकाद्धो ध्यमुञ्वा। ऐकध्यम्। एक-
धा। एकाद्वा किन्नु सहाये। एकाकी। क्रियाभ्यावृत्तौ कृत्वसुच्। पञ्च कृत्वः। सप्त कृत्वः। द्वि-
त्रिचतुर्भ्यः सुच्॥ द्विः। त्रिः। चतुः। एकस्य सकृदादेशश्च। एकवारं सकृत्। बह्वल्पार्थात्का-
रकाच्छस्। बहुशः। अल्पशः। संख्यापरिमाणाभ्यां वीप्सायाम्। द्वौ द्वौ इति द्विशो ददा-
ति। प्रस्थशः। माषशः। तयडयचौ संख्याया अवयवे। द्वाववयवौ यस्य द्वितयम्। त्रि-
तयम्। चतुष्टयम्। चतुष्टयी। स्त्रीपुंसाभ्यां नञ्स्नञौ। स्त्रियां भवः स्त्रैणः। पुंसि भवः
पौंस्नः॥ वीप्सायाम्पद्द्विः। वृक्षं वृक्षं सिञ्चति। ग्रामो ग्रामो रमणीयः। परेर्वर्जने वा द्वित्व-
म्। परि परि वङ्गेभ्यो वृष्टो देवः। परि वङ्गेभ्यो वृष्टो देवः। वङ्गान्परिहृत्येत्यर्थः। उपर्यध्यधस-
सामीप्ये द्विः। उपर्युपरि ग्रामम्। ग्रामस्योपरिष्टात्समीपदेश इत्यर्थः। अध्यधि सुखम्॥ ९

सुखस्थो पविस्थानसखौ यथैद्या दस्यर्थः। व्याख्या है स्स स्थौ थम्र स्थारकूलो सम्यति कौयकूलान
भर्त्सैमु। अमृत्याया कुथा कुवच्य। सुन्दर सुन्दर कुयासे सौन्दर्यमि। सम्मती। देवदेव द॰
न्तोऽसि। कोये। दुर्विनीत दुर्विनीत व्यक्तानी च्यान्यथि। कुत्सने। धानुष्क धानुष्क तथा न भ॰
नुः। भर्त्सने। चोर चोर घातक विस्याभित्वा मृ। द्विरुक्तो एक शब्दो बहु ब्रीहि वत्। तेन विभक्ति
लोपपुंवद्भावौ। एकैकमक्षरं। एकैक बाहुल्यात् द्विर्भावे पुंवद्भावो द्वयपदं निषेधः। पक्षी जातोऽ
वग्रहः। एक एक या इत्यादि विग्रहः। एकैकस्यै देहि। यीक्तमो बोत्थाया है स्त्री बहुब्रीहि वत्। ग्र॰
मवात: विरहा त्योञ्जा माम स्थो यथुक्तिः। गतगता। सादृश्ये कोस्यै गुणवचनस्य है स्त्री बहुब्री॰
हिवत्। पटुपट्वी पटुपटुः। मृदुमृदुः। दृष्टस्य कृतिरित्यादि। गुणोपसर्जनं कृत्या या चिनः कैव॰
लगुणा वाचिनः स्त्रीद्व पक्षितो। शुक्ल शुक्लः पटः। शुक्ल शुक्लं रूपं। अनुकम्पे योऽस्ये है। मूले मू॰
लेस्थूलो वृक्षः। सम्बोधनं अनुसाहेलो कृशा प्रयोगः। लब्धे १ कुत्सने ३ क्रिया समभि हारे १ ॰
लुनो हि लुनीहि दलो कावं सुनाति। कर्म्याति हरे सम्बाहे स्त्री विधये गणसम्पन्न बहुतावा।

बहुलग्रहणादन्यपरयोर्न समासवत्। इतरपूर्वस्य नित्यं समासवत्॥ असमासवद्भावे
पूर्वपदस्थाया विभक्तेः सुरादेशो वाच्यः। अन्योऽन्यं विप्रा नमन्ति। अन्योऽन्यौ। अन्योऽ-
न्यान्। अन्योऽन्येन कृतम्। अन्योऽन्यस्मै दत्तमित्यादि। अन्योऽन्येषां पुष्करैरामृशं-
न्त इति माघः। एवं परस्परम्। वाच्यस्य स्यादित्वान्तः। इतरेतरम्। इतरेतरेणेत्यादि।
स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा। अन्योऽन्यामन्योऽन्यम्। परस्परां परस्प-
रमितरेतरामितरेतरं वा इमे ब्राह्मण्यौ कुले वा भोजयतः। द्वन्द्वत्वेऽप्यव्ययीभावः क्लीबे तु वि-
ग्रहस्यमोः। समासे सोर्लुक् चेति सिद्धं चाद्युक्तकाल्पनम्। समासे सोर्लुक् चेत्यस्योदाहरणा-
न्तु। अन्योऽन्याश्रयः। परस्य साहित्यसादृश्यमित्यादिकं बोध्यम्। अकृच्छ्रे प्रियसुखयोर्वा-
द्वित्वम्। प्रियप्रियेण ददाति। प्रियेण वा। सुखसुखेन ददाति। सुखेन वा। अतिप्रियमपि व-
स्त्वनायासेन ददातीत्यर्थः। यथास्वे यथायथम्॥ यथाशब्दस्य द्वित्वं क्लीबत्वञ्च भवति।
यथास्वमिति वीप्सायामव्ययीभावः। यो य आत्मीयो यद्वात्मीयं तद्यथास्वम्। यथायथं-

ज्ञातायथा स्वभावमित्यर्थः। यथालीयमिति वा। द्वन्द्वं रहस्य मर्य्यादावचनव्युत्क्रमणय-
ज्ञपात्रप्रयोगाभिव्यक्तिषु। एष्वर्थेषु द्विशब्दस्य द्विर्वचनम्पूर्व्वपदस्याम्भावोऽत्वञ्चोत्तर
पदस्य नपुंसकत्वञ्च निपात्यते। तत्र रहस्यं द्वन्द्वशब्दस्य वाच्यम्। इतरे तु विषयभूताः।
द्वन्द्वम्मन्त्रयते रहस्यमित्यर्थः। मर्य्यादा स्थित्यनतिक्रमः। आचतुरं हि मे पशवो द्वन्द्वं मि
थुनायन्ते। माता पुत्रेण मिथुनङ्गच्छति। पौत्रेण प्रपौत्रेणापीति मर्य्यादार्थः। व्युत्क्रमणं
पृथगवस्थानम्। द्वन्द्वं व्युत्क्रान्ताः। द्विवर्गसंबंधेन पृथगवस्थिताः। द्वन्द्वं यज्ञपात्राणि प्र
युनक्ति। द्वन्द्वं संकर्षणवासुदेवौ। अभिव्यक्तौ साहचर्येणेत्यर्थः। चार्थे द्वन्द्व इति निपात-
नात्पुंस्त्वमपि। शेषानिपात्याऽकल्याण्यः। का संख्या येषां ते कति दाविकः। शांशपः। दा
त्यौहः। सार्षसत्रः॥ आसमः॥ इति श्री रामाश्रमाचार्य्यविरचितायां सिद्धान्तचन्द्रि-
कायाम्। पूर्व्वार्द्धं सम्पूर्णम्॥ चैत्रकृष्णत्रयोदश्यां शनौ महावारुणीपर्वणि वैज-
नाथेनालेखि संवत् १९३१॥ ॥ ॥ ॥ ॥


अथ आख्यातप्रक्रियानिरूपणं

उ॰ २

॥श्रीगणेशाय नमः॥ धातोः इत्यधिक्रियते। आदिः क्रियावाची भ्वादिर्धातुसंज्ञकः स्या
त्। आदनुदात्तङितः अनुदात्तेतो ङितश्च धातोरात्। भिन्नस्थितेः ञितः स्वरितेत-
श्च धातोरात्मनेपदं स्यात्कर्तृगामिनि फले। शेषात्कर्तरि परस्मैपदम्। तिबादीनामाद्यानि नव
वचनानि परस्मैपदसंज्ञानि स्युः। पराणि नव वचनान्यात्मनेपदसंज्ञानि स्युः। तानि च त्री
ण्यादि त्रीणि त्रीणि भागैः। तिवादिकार्थेषु नामादिरूपप्रत्ययेषु प्रथममध्यमोत्तमाः स्युः
रात्पयोः। नाम्नि प्रयुज्यमाने चाद्ये प्रयुज्यमाने प्रथमः। युष्मदि मध्यमः। अस्मद्युत्तमः। क
र्तरि पंचचात्वात् भूसत्तायां। भ्वादिलकारौ तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आतां
झ थास् आथे ध्वे इट् वहे महे वर्तमानार्थक्रियावृत्तेर्धातोस्तिवादयः प्रत्यया भवन्ति एषां
संज्ञा लट्॥ अपकर्तरि कर्त्रर्थे तिवादिषु परेषु शप्प्रत्ययो धातोः स्यात्॥
गुणः॥ नाम्यन्तस्य धातोर्गुणो भवति अपि ङित् प्रकारेऽन्त्यादिकं च विहाय अन्यः
प्रत्ययो ङिद्वत्स्यात्। क्ङिति च। क्ङिति च परे वृद्धिगुणौ न द्विर्वचन हेतुके उपसिद्धपराः २

सि·चं· उ· १

स्यात् इति तसि गुणा प्राप्तौ अपनिमित्तो गुणः। भवतः। ओ रेभ नो लोपो भवत्यकारे एकारे च परे। भवंति। भवसि। भवथः। भव थ ओ। वमयोपर योरत आत्वं स्यात्। भवामि। भवावः। भवामः। स भवति। त्वं भवसि। अहं भवामि। युगपत् प्राप्तौ परः सच त्वं च भवथः। अहं च त्वं च भवावः। स च अहं च त्वं च। भवामः। विधि संभावनयोः यात् यातां युस् यास् यातं यात यां याव याम ईत ईतां ईरन् ईथास् ईयाथां ईध्वं ईय ईवहि ईमहि। विधिः कर्तव्यार्थोपदेशः। संभावनं कल्पनं तत्र यादयः। सप्तमी संज्ञा लिङ् वा अतः परो यादेः स्यात्। भवेत्। भवेतां। युस इट्। अतः परस्य युस इडागमः स्यात्। भवेयुः। भवेः। भवेतं। भवेत। यामियं। अतः परो यामियं स्यात्। भवेयं। भवेव। भवेम। शिष्यो गुरुं भजन् सुखी भवेत्। विधिः। भवेदसौ वेदविद्। आशिषि स्यात्। आशीः प्रेरणयोः तुप् तां अन्तु हि तं त आनि आव आम। तां तात्। अंतौ स्वं आनो ध्वं रे थु माव ईयु। आशीः प्रेरणयोः लोट्। आशी: परस्येष्टार्थ प्रार्थनं वा प्रेरणं प्रवर्तनं नानुवादः। एषां सप्तमी लोट्। तुह्योस्तातङ्वाशिष्यवा १

क्रि॰
उ॰
४

भवतु भवतात् भवतां भवंतु । भव॰ ॥ भव॰ [illegible] भव भवतात् भवतं भवत
भवानि भवाव भवाम अथ ह्यस्तन्याः [illegible] भव [illegible] भवतु भवतात् [illegible]
[illegible] आदि [illegible]
ता आरभ्ये [illegible] यामिन्याः प्रथमं याम [illegible] दिवसः सकलः [illegible]
चतनो [illegible] काले तत्र दिवा ह्यस्तनः । एवं संज्ञा लङ् [illegible] ॥
दिवाद्यदिः धातोः १ अभवत् अभवतां अभवन् अभवः । अभवतं अभवत अभवं अभवाव
व अभवाम ह्यो भवत् [illegible] परोक्षा [illegible] अतुस् उस् थप् अथुस् अ णप् व म ए [illegible]
रेम आथे [illegible] । धातोः परोक्षे [illegible] काले णबादयः स्युः संज्ञा । लिट् द्विश्च [illegible]
वादि [illegible] धातो द्वित्वं [illegible] अनेक स्वरस्य धातोः [illegible]
[illegible] पूर्वस्य [illegible]
परो ह्रस्वः पूर्वं सर्वधिनो दीर्घस्य ह्रस्वः झपानां जबचपाः पूर्वस्य झपानां जबाः स्युः [illegible] ४

पभाता जङ्ङ्वा वाः स्वच्छ छठ्या नां चटतकपाः स्युः। भुवोवुक्। भुवो वुग्गा गमो णादौ स्वरे।
बभूव बभूवतुः बभूवुः। कादेर्णादेः कसृभृवृस्तुद्रुस्रुश्रुवृत्य एभ्यः परस्य वसादेर्णादेरि-
ड्नभवति। अन्यस्मात्तु भवतीति नियमादिट् स्यात्। बभूविथ बभूवथुः। बभूव बभूव बभू-
विव। बभूविम वल्लिर्वल वानुबभूव। आशिषि यात् यास्तां यासुः यास्त्यास्तं यास्त यासं
यास्व यास्म सीष्ट सीयास्तां सीरन् सीष्ठाः सीयास्थां सीध्वं सीय सीवहि सीमहि धातोरा-
शिषि प्रत्ययाः स्युः एषां संज्ञा लिङ्। आशीर्यालिङ्ः पंक्तित् भूयात् भूयास्तां भूयासुः। भूयाः
भूयास्तं भूयास्त भूयासं। भूयास्व भूयास्म सम्प्रीमान् भूयात्। श्वस्तने ता तारौ तारस् तासि
तास्थः तास्थ। तास्मि तास्वः। तास्मः। ता तारौ तारस् तासे तासाथे ताध्वे ताहे ता-
स्वहे तास्महे। श्वो भाविन्यर्थे तादयः। एषां संज्ञा लुट्॥ क्षिसिता सीरस्य पामिट् भविता
भवितारौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवि-
तास्मः। श्वो भविता राज्यभारः कुमारस्य। स्यादौ भविष्यति स्यप्। स्यतो भविष्यति काले

स्यप्रत्ययो भवति दिवादिष्वपरतः एषां संज्ञा लृट् भविष्यति भविष्यतः भविष्य-
न्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः कल्की धर्मपाल-
को भविष्यति स्य क्रियातिक्रमे क्रियायाः अतिक्रमे कृते सति निष्पन्नो सत्यां स्य प्रत्ययो भ-
वति दिवादिपरतः एषां संज्ञा लृङ् यदि सुवृष्टिः सुभिक्षं चाभविष्यत् तदा सुभिक्षमभवि-
ष्यत् अभविष्यतां अभविष्यन् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं अभवि-
ष्याव अभविष्याम ॥ भूते सिः। धातोर्भूतमात्रे काले सिः प्रत्ययो भवति दिवादिपरतः एषां सं-
ज्ञा लुङ्। स्वरेः पोपिपरे भोपिस्त्वा स्यात् भूस्थादिभ्यः परस्य सेर्लोपः स्यात्सा धातोः-
भुवः सिलोपे अद्वृत् लुङि गुणेन अभूत् अभूतां भुवः सिलोपे वुक् अभूवन् अभूः अ-
भूतं अभूत अभूवं अभूव अभूम माङि सिरेव न सोऽडिति दिवादिः माङ्योगे अडो लोपः
मा भवान् भूत् मास्म भवत् भूभालावालोन् भवते आत्मनेपदे अनः परस्मात् आत्मनेपदं
भवते। भवेते भवन्ते भवसे भवेथे भवध्वे भवे भवावहे भवामहे भवेत भवेयातां भवेरन् ॥

सि॰ चं॰ उ॰ ७ भवेथाः भवेयाथां भवेध्वं भवेय भवेवहि भवेमहि भवतां भवेतां भवंतां भवस्व भवेथां भवध्वं भवै भवावहै भवामहै अभवत अभवेतां अभवंत अभवथाः अभवेथां अभवध्वं अभवे अभवावहि अभवामहि बभूवे बभूवाते बभूविरे बभूविषे बभूवाथे। नामिनोऽचतुर्णां धोढः। नाम्यंताद्धातोः परस्य सीध्वंलुङ्‌लिटांधस्य ढः सेटो हला द्वा बभूविढ्वे बभूविध्वे। बभूवे बभूविवहे बभूविमहे भविषीष्ट। भविषीयास्तां भविषीरन्। भविषीष्ठाः। भविषीयास्थां। भविषीढ्वं। भविषीध्वं। भविषीय। भविषीवहि। भविषीमहि। भविता भवितारौ। भवितारः। भवितासे। भवितासाथे। भविताध्वे। भविताहे। भवितास्वहे। भवितास्महे। भविष्यते। भविष्येते। भविष्यंते। भविष्यसे। भविष्येथे। भविष्यध्वे। भविष्ये। भविष्यावहे। भविष्यामहे। अभविष्यत। अभविष्येतां। अभविष्यंत। अभविष्यथाः। अभविष्येथां। अभविष्यध्वं। अभविष्ये। अभविष्यावहि। अभविष्यामहि। अभविष्ट। अभविषातां। आतोऽतोऽदनंतः॥ आतोऽंतोऽद्भवत्यकारादुत्तरस्यन अभविषत। अभविष्ठाः। अभविषाथां। ध्वे- ७

सि॰ चं॰ च सेर्लोपः। अभुद्धं। अभुद्ध्वं। अभुत्सि। अभुत्स्वहि। अभुत्स्महि। चिती संज्ञाने
उ॰ उपधायां लघोः॥ धातोरुपधायां लघोरिको गुणः। चेतति। ४ पूर्व्वस्य हसादिः शेषः। पूर्व्व
८ स्यादिर्हसः शिष्यते अन्ये हसा लुप्यंते। चिचेत। चिचेतिथ॥ सेः॥ सिप्रत्यये परयोर्द्विः सि-
चोरिट्। चूट् चेटि। चूटः परस्य सेर्लोपः चेदि। अचेतीत्। अचेतिष्टां। स्यादिटः। सेवातो विदस्य
तस्या न च स भवति। अचेतिषुः। च्युतिर् आसेचने। च्योतति। च्योतेत्। च्योततु। च्योततात् वा अ-
च्योतत्। चुच्योत। च्युत्यात्। च्योतिता। च्योतिष्यति। अच्योतिष्यत्॥ इरितो वा। इरितो धातो
र्ङः प्रत्ययो भवति परस्मैपदादेः। अच्युतत्। अच्योतीत्। श्च्युतिर् क्षरणे। श्च्योतति। श्च्योते-
त्। श्च्योततु। श्च्योततात्। अश्च्योतत्। यथा सात्वपाः पूर्व्वस्य शासाः परः खपाः शिष्यंते
न शासाः। चुश्च्योत। श्च्युत्यात्। श्च्योतिता। श्च्योतिष्यति। अश्च्योतिष्यत्। अश्च्युतत्। अ-
